International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 116-119
© 2020 IJSR
www.anantaajournal.com
Received: 04-11-2019
Accepted: 08-12-2019

**बि. वेङ्कटेश्वर रावः**
शोधछात्र, आ.नागार्जुन विश्वनिद्यालयः गुण्टूरु, आन्ध्र प्रदेश, भारत

**डां. डि. यन्. दीक्षितः**
मार्गदर्शक, आ.नागार्जुन विश्वनिद्यालयः गुण्टूरु, आन्ध्र प्रदेश, भारत

**Corresponding Author:**
**बि. वेङ्कटेश्वर रावः**
शोधछात्र, आ.नागार्जुन विश्वनिद्यालयः गुण्टूरु, आन्ध्र प्रदेश, भारत

# धन्वन्तरिणा उक्तं पशुभिः प्रयोजनम्

**बि.वेङ्कटेश्वर राव, डां.डि.यन्.दीक्षित**

**प्रस्तावना**

1. **गजः** - गजस्य मांसः न भोजनोपयोगि किन्तु गजवाहनेन उल्लाघः(रोगशक्तिः) त्रिदोषशआन्तिश्च भवति । गजक्षीरं च प्रमेहः, कुष्ठः,गुल्मः इति रोगान् निरस्यति ।

हस्तीद्विपोगजोनाग इभश्चद्विरदः करी ।
वारणः कुञ्जरोदन्ती मातङ्गष्षष्ठिहायनः ।।
दन्तावलो गजश्चैव पद्मीस्तम्भेरमोमतः ।
न एकलभः प्रोक्तः कुम्भीचकथितो बुधैः ।।
कुञ्जरारोहणं कुर्यात्रिदोषशमनं परम्
दुग्धं प्रमेहशमनं कुष्ठगुल्महरंपरम् ।। [1]
धन्वन्तरिनिघअमटुः, सुवर्णादिवर्गः, पृ -- 254

2. **अश्वः** - अश्वस्यापि आरोहेण मूत्रव्याधिः नश्यति । व्याधेः नाम मूत्रकुच्छ्रः मूत्रस्य विसर्गे यः क्लेशः सनिवारितो भवतीति भावः। "स्यात् कष्टं कृच्छमाभीलं " इत्यमरः अपि च त्रिदोषाः अश्वयानेन नष्ठाः भवन्ति । अश्ववेगेन शरीरस्य चलनाधिक्यत् एवं भवेत् । अश्व बऽबा क्षीरं तु चित्तभ्रम निवारकम् ।

घोटाश्वतुरगोवाजी हरिरुसस्तुवङ्गमः ।
शालिहोत्रोजवीसप्तिस्तुरङ्गस्सैन्धवोहयः ।।

अश्वीरोहणमात्रन्तु मूत्रकृच्छ्रविनाशयेत् ।
त्रिदोषशमनंबलं तद्दुग्धंभ्रमनाशकम् ।। [1]

3. **उष्ट्रः**- उष्ट्रस्य क्षीरं शीतनाशकं अर्शसः उपशमकं क्रिमिनाशकं महोरशमकं भवति ग्रहपीडां च निवारयति । वीर्यं क्षणतां निरूध्य धातुपुष्ठिकरं भवति ।

उष्ट्रः क्रमेलकोधूम्रः करभोदीर्घमार्गगः ।
द्विककृच्छं कुनासश्च दीर्घग्रीवोघ म्रकः ।।
क्रमेलदुग्धं शीतघ्नमर्शोः क्रियामबुदरपहम् ।
ग्रहभूतप्रशमनं नष्टेद्रियकरं परम् ।। [1]

4. **गर्दभः** - गर्दभस्य क्षीरं शरीरबलवर्धकं भ्रमं मूत्रकृच्छं निवारयति ।

बालानामपि रोगहारकम् ।
गर्दभश्शदुकर्णश्च बालोयोशसभःखरः ।
भारवाहीभूरिगामो धूसरोरेणु भूषितः ।।
खरदुग्धं भ्रमहरं कायसिद्धिकरं परम् ।
कामिलामूत्रकृच्छ्रघ्नं बलरोगहरंपरम् ।। [2]

5. **छागलः** – छागलस्य मांसः गुरुः स्निग्धश्च भवति । श्वास रोगान् कासरोगान् वातरोगान् प्रदररोगान् शोषकि कफदोषं च जेतुं प्रभवति।

छागलोबर्कश्चागः चलपादस्तुबस्तकः ।
वोलकश्चैडकोजाच लम्बकर्णस्तथैवच ।।
अजमांसं गुरुस्निग्धं श्वासकासानिलापहम् ।
प्रदरंहन्ति गुरुस्निग्धं च पित्तघ्नं कफदोषजित् ।। [1]

6. **मेषः**- मोषमांसं मधुरं शीतवीर्यं गुरुं च भवति । त्रिदोषहारकं भवति ।

प्रतिश्यायं ज्वरं च निवारयति शरीरकान्तिं वृद्धिं करोति ।

तगरुर्मेद्रं मोषा च ह्युरभ्र उदणस्तथा अतिलोमस्तभोर्णाम् युरेडकोवृष्टिरेव च।
तगरोर्मधुरं मांसं शीतवीर्यन्त्रिदोषजित् प्रतिश्यायाज्वरहरं गुरुकान्ति प्रदंनृणाम् ।। [2]

7. **महिषः** - महिष वृषभयोः मांसेन गुणः यद्यपि धन्वरिनिघण्टौ ऐदाहृतः तथापि बहुभिःजनैःतन्मांसं उपयुज्यते । त्वचा च दूनि प्रयोजनानि प्राक् निरूपितानि । आरण्यकस्य धेनोः गावयस्य मांसगुणं तु कोशे उदाहृतः । गवस्य मांसं वीर्यवृद्धिकरं बलकरं स्वदुः च उदाहृतम् ।

महिषः कासरः श्रृंगी श्चामः कृष्णोलूलायकः ।
विषाणीकलुषो दंशी पीनस्कन्धोरजस्वलाः ।।
महिषः सलिलप्रीतिस्वशक्तिर्भारवाहकः ।
अनड्वांस्तुबलीवर्धः ककुद्मान्वृषभोवृषः ।
उक्षा चे सौरभेच्च गोपतिश्शंतर प्रियः ।।
प्रातर्दशीं च वृषभं कल्याणं च फलप्रदम् ।
ऐश्वर्यं लभते नित्यं शंकरस्यानुवाहनम् ।।
तस्यपुत्रीभानुमती गौरत्रसुरभिर्वसु माहेयी बहुलाधेनुस्सौरभेयी च नन्दिनी ।
गावस्य तु मांसन्तु वृष्यंबल्यंरुचिप्रदम् धातुवृद्धिकरंचैव मुनिभिः परिकीर्तितम् ।।

8. **व्याघ्रः** - व्याघ्रस्य चर्मणा प्रयोजनमेव धन्वन्तरि निघण्ढौ दृष्टम् । व्याघ्रचर्म यौगिभः आसनार्थं उपयुज्यते । व्यघ्रनखधारणं ग्रहदोष निवारकं आयुः बुद्धिकरं देहवृद्धिम् च ।

व्याघ्रः पञ्चनखोव्यालश्शार्दूलश्च गुहाशयः पुण्डरीकस्तीक्ष्णद्रष्ट्रस्तरस्वीघोरदर्शनः।।
सुखासनं व्याघ्रचर्म भिक्षुप्रीतिकरं तथा तन्नखोग्रहदोषगघ्नस्तथायुर्देहवर्धनः ।। [1]

9. **वराहः** - वराह मांसं बहुजनप्रियम् । वातघ्नं बलवर्धकं कान्तिकरं च । वराहमांस धूपः ज्वरनाशकः भूतबादा निवारकः दुष्टव्रणहरश्च ।

सूकरोवज्रदंष्ट्राश्च बराहोमोमशः किटिः दंष्ट्री दंष्ट्रायुधः क्रोडो वीरस्कन्धो बहुप्रजः ।।
स्तब्धरोमाबलीकोलो घृष्टिः प्रोत्रीकिरस्मृतः स एव कथितो घोणी पृथुवाराहनामतः ।।
किटिमांसं वातकरं बलवर्णकरंपरम् तद्धमोज्वरभूतघ्नो दुष्टव्रणहरः परम् ।। [2]

10. **मृगः** - मृगमांसस्य जनप्रीतिकरत्वं प्रसिद्धमेव । मधुरगुणं लघुबलकरं वीर्यवृद्धिकरं त्रदोषहरं च ।

मृगोघहरिणोन्यङ्कः सारङ्गः पृषतोरुरुः ।
एणश्शबलपृष्ठश्च पिशङ्गश्चारुलोचनः ।।
न्यङ्कस्वादुर्लघुर्बल्योवृष्योदोषत्रयापहः ।। [1]

11. **शुनकः** - श्व मांसः यद्यपि मासाहारैः अपि नादृतः । तथापि वातनाशकरः उदाहृतः विपाकदशायां उष्णकरश्च ।

कुक्कुरः सारमेयश्च भीषणः शुनकस्तथा ।
भूस्तरोभषकरम्वास्यादलरको रात्रिजागरः ।।
कौलेयोमृगदंशश्च वान्तादः सुमुखस्तथा
सूकरारिः कृतज्ञश्च मृगयालुशलस्तथा ।। [2]

12. **बिडालः** - माराजालचर्मणा धूमेण ग्रहपीडा भूतपीडा ज्वरदोषः कुष्ठः कण्डूः दद्रः त्यादि रोगाः शान्ताः भवन्ति ।

बिडालोविषदंष्ट्रश्च मूषिकारिर्बिडालकः वृषदंशश्चमार्जालो मायावीदीप्तलोचनः ।।
मार्जालचर्मजोधूपो ग्रहघ्नो भूतनाशनः ज्वरदोषहरः कुष्ठ कण्डूदद्रुविनाशनः ।। [1]

13. **श्रृगालः** - श्रृगालमांसस्यापि गुणाः धन्वतिरिणा उदाहृताः । किन्तु श्रृगालमांसस्य विनियोगः न श्रूयते । तथापि औषधरूपेण तस्य गुणाः दर्शिताः । गुणेन कटुः समस्तवातरोगनिवारिकः क्षयरोगनिवारकश्च । धातूनां पुष्टिं शरीरपुष्टिं त करोति।

श्रृगालोजम्बुकः क्रोष्टा गोमायुः क्राष्टकः शिवा ।
वञ्चकोमृगधूर्तश्च भूरिमायोधभौरवः ।।
श्रृगालमांसं कटुकं गन्धर्वव्याधि नाशनम् ।
वृष्यं पुष्टिकरं बल्यं सर्ववातक्षयापहम् ।। [2]

14. **मर्कटः** - मर्कटस्य क्षीरगुणः एव दर्शितः । क्षीरं कटुकं भवति । सन्याज रोगस्य श्वासरोगस्य च निवारकं भवति ।

मर्कटो वानरः कीशो करिरशाखा मृगः कपिः ।
प्लवङ्गमो वनैकाश्च प्ववङ्गः प्ववगः प्लवः ।।
प्लवङ्गगं क्षीरं कटुकं कांससन्यास श्वासजित् ।। [1]

एवं सर्वेषां पशूनां लोकोपकारकत्वं अस्मिन् प्रकरणे निरूपितम् । जीवन्ता एताः अपि पशवः मानवजातिः बहुधा उपकारकाः इति स्पष्टम्। विशेषतः कृषिकर्माणि पशूनां विनियोगः मानवप्राणरक्षायाः जीवातुभूतः। गतां महिषां च क्षीरं मेषादीनां मांसं आहाररूपेण प्राणदायको भवत्येव । अपि च कैश्चित् औषध उपयोगोपि दृष्टः ।

एतान् उपकारान् अतीत्य पशूनां उत्सर्गैः अपि प्रयोजनं बहुधा दृष्टम् । मृगमलादयः पदार्थाः सुगन्धद्रव्यरूपेण औषधरूपेण उपयुज्यन्ते । एतेषां द्रव्याणां कृतं तत् घारकाः मृगाः हन्यन्ते च यथा-

चर्मणि द्वीपिनं हन्ति दन्तयो र्दन्ति कुञ्जरम् ।
बालेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ।। [1]
सीमाः अण्डकोशः पुष्कलकः गन्धमृगविशेषः ।

गन्धमृगाश्च यथा ---

चित्ररेखाकरीधूर्णी मार्जालीगन्धमार्जनी ।
सुगन्धगात्रावसना कस्तूरीरोमशाल्यपि ।।
मुगन्ध पूतवृषणी बिडालीकाण्डचालिनी ।
तत्कोशंवृष्यमायुष्य सौरभंगात्रगन्धजित् ।। [2]

15. **कस्तूरी मृगः** - पुष्कलकः एव कस्तूरी मृगः नाम्ना प्रसिद्धः । प्रायशः हिमवत्पर्वत प्रान्तेषु एव एते चरन्ते । एतेषां सीम्नः कस्तूरी लभ्यते । शीतज्वरार्तानां औषधार्थं उपयुक्तः । अद्यापि सद्यः प्रसूताभ्यः गृहेषु प्रसूति वातनिवारणाय कस्तूरी दीयते । भगवत्सेवासु चन्दनेन मिश्रितोऽयं उपयुक्तः । "कस्तूरी तिलकं" - इत्यादि स्तोत्राणि प्रसिद्धान्येव । चन्दनेन तं मिश्रणात् यक्षकर्दमनामकः अनुलेपः क्रियते । एवं बहूपकारकाणां पशूनां प्रस्तावः संस्कृत वाङ्मये कीदृशो वर्तते इति विचारः एवं अत्र शोधनिबन्धे विवक्षितः ।

## संधर्व सूची


1. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ -- 254
2. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ – 255
3. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ -- 255
4. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ -- 255, 256
5. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ – 256,257
6. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ ---258
7. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ ---285,259
8. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ ---258
9. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ ---
10. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ --- 259,260,
11. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ --- 261
12. सिद्धान्तकौमुदी -- कारकप्रकरणम्, निमित्तात्कर्मयोगो व्याख्या
13. धन्वन्तरि निघण्टुः, सुवर्णादिवर्गः, पृ --- 260